द्देवंभक्तिस्वभावयुक्ताः॥ ८३॥ ताकिंकरीहंत्वयदंस्तुतिदेवानाश्रुणुत्व
त्वमेवविभूतिभुक्तो॥ वदामिनान्यंनपश्यामिचान्यंशृणोमिनान्यंन
विचिंतयामि॥ ८४॥ स्मरामिनान्यंनभजामिचान्यंध्यायामिना
न्यंनवितर्कयामि॥ यामिनान्यंतवपादपद्मात्वांविश्वयो
निंशरणंप्रपद्ये॥ ८५॥ पर्वाणदेवंत्वमिहासिदेवीनाराधयंतीह
चयेकुबुद्धयः॥ धन्यास्तएतेप्रविशंतितेसदाश्रीमद्दुर्गेनेत्रवचवा
ङात्मनां॥ ८६॥ ऋषिरुवाच इतिवाक्यंसमाकर्ण्यसामामतन्तसं
स्मितं॥ प्रसन्नाभून्महाकालीद्विपदानामधिस्थितोत्सवः॥ ८७॥ इत्यु

कु.
७५

गांरी ॥ रक्ताद्रियां सांतमदाविघूर्णां कालीं शरण्यां शरणं प्रजामि ॥ ८८ ॥
ऋधोरवीजं वकपीश्वरस्थं चिंतामणिः कुब्जिक कामरूपे ॥ विद्या
चाविद्या भुवनकामराजं क्रामः कलोकामिनि कामराजे ॥ ८९ ॥ वह्नि
चधूमं मंत्रजोपमीशि विश्वं भुवनात्तीश्वार देवि वंद्यं ॥ मंत्रेण चाने
न सिद्ध्यंति सर्वा सुसिद्धयः सर्वजगान्निवासे ॥ ९० ॥ पंचारयुग्मं
च त्रिकोणयुग्मं भुवनच्छपंचारयुग्मेन वंद्य ॥ कलाविकोटं किलभू
गृहं च पत्रैश्चवरं तेन च वदा जवा हे ॥ ९१ ॥ संपूज्य पैत्रं तव किंचिना
केनि पापिनः सहसा संभवंति ॥ प्रसाद कालस्तव मार्गीनुसारीणः
कुलानुवर्त्याचरमापविज्ञाः ॥ ९२ ॥ नासिाहु मंद्रंचवशानुगम्या ने

स पाति च महाघोरं नरकं लाहलोकिलं ॥ ५३ ॥ लिख्यते परमेशान प

कां वा प्रणां विघूर्णितः ॥ लक्ष्मीस्तोत्रं विना सत्पूरश्चर्या स्तोत्रेनैव विद्य

ते ॥ ५४ ॥ श्रीभैरव उवाच ॥ एवमुक्त्वा तदा देवी तूष्णीभावमवाप्य सः

इति श्रीसरस्वतीस्तोत्रं संपूर्णं ॥ अथ लक्ष्मीस्तोत्रं लिख्यते ॥ त्रैलोक्ये

लसमादाय शिवाबाचक्षुदा प्रतः ॥ ५५ ॥ तदा वक्त्राग्निमर्दत्याभिमर्म

हाकाली महेश्वर ॥ देववंदिनि हन्त्वाभिलीकानां हितकाम्यया ॥ ५६

शिव उवाच ॥ शिवा मानसंध्यां विविधपद्मा कालीकलामालिनि

शिवमवेद्या ॥ कपालखड्गांगधराकुण्डमालाविभूषांगच शि

नां ॥ ५७ ॥ तत्प्रकशांचशवासनस्थां विभीषणांगीव पनीमु

५.
७८

भाजोभाग्यमेवाद्यकरस्थितेयं ४७ ॥ ऋषिरुवाच ॥ इति श्रीस्तु
तया देवी महालक्ष्मी ददर्श ह: ॥ चतुर्भुजां त्रिनयनां महावासरघा
तिनी ॥ ४८ ॥ प्रसन्नां श्रीमन्महालक्ष्मी प्रसन्नास्तुतिगौरवात् ॥ उवा
चस्मितशोभाढ्या नारायणमजं विभुं ॥ ४९ ॥ श्रीदेव्युवाच वरंवर
यदेवाभिमतं नारायण सनातन ॥ दास्याम्यद्याप्यदातव्यं तं वस्तुत्याव
शीकृता ॥ ५० ॥ नारायण उवाच ॥ मातः परमकारुण्ये महालक्ष्मिवर
प्रदे ॥ कुलाचारमतिर्मेस्तु दृढं तेस्तु तथापि वै ॥ ५१ ॥ सर्ववस्तुजात
परं तत्वस्तु प्रीतिकारकं ॥ श्रीदेव्युवाच ॥ वरमेतन्महाभाग नारा
यण सनातन ॥ ५२ ॥ सकृमेतन्महिन्नापस्तु पठेत्सर्वथानी नरः

७८

त्ति प्रत्यक्षस्य श्रीवीजैन्यासं विधाय प्रजपंति यत्नात् । त एव राजेंद्र नि
घ्नप्रवादा विद्याधरेंद्रसंघो मालभंते ॥ ४३ ॥ पूजा जपयंत्रविधा
नामहेशि समभ्यासरक्ताः परमंसुभाग्याः । जयंति ये त्वां विविधा
र्थधात्रीं त एव धन्याः कुलमार्गनिष्ठाः ॥ ४४ ॥ जानंति के साधव
शास्त्ररूपा ब्रह्मादिगीतं महिमा महेशि ॥ कश्चिन्मूढो नो निज ध
र्मलाभादानंति ते देवपरं स्वधाम ॥ ४५ ॥ श्रीविधाय कुंडे विधि
ना स्थांडिले वा शोणगंधि होमं सतर्पणं प्रकुर्वंति ॥ त्वत्तो बलं जायते
भाग्यभाजस्ते वांछितं दैवैरपि योगगम्यं ॥ ४६ ॥ ये नस्तु तत्तिं प्रपत्तो वि
श्वसारा स्तोत्रैरुदारैः कुलयोगभक्ताः ॥ त एव धन्याः वरमोपि

स्तुतिं गीतकथितवीजप्रभावां करणाख्यवीजां परमार्थमंत्रां त्वां विश्वपा
विनिं शरणं प्रपद्ये ॥३८॥ वैश्वानरस्त्रीसहितेन देवीं श्रीमंत्रराजेन
विराजमानां ॥ सर्वार्थधात्रीं वरदां वदान्यां त्वां विश्वपावनि शरणं
प्रपद्ये ॥३९॥ त्रिकोणपंचारयुगष्टभांकां वसुकोणाधिष्ठां भूपुर
स्थरयुक्तां स्वर्णांचचक्रां रतिनिवासभूतां त्वां विश्वपावनि शरणं
प्रपद्ये ॥४०॥ पुनर्दशारद्वितिपत्रयुक्तां वं चापक्रोधांकितां भुजगृहां च
चक्राधिवासां पावयंत्ररूपां त्वां विश्वपावनि शरणं प्रपद्ये ॥४१॥
संभावितां सर्वधात्र्यां समस्तरूपां सर्वस्वरूपां पावयसर्वसेव्यां ॥ सर्वा
तीतस्थानस्वरूपां चतुर्थीं त्वां विश्वपावनि शरणं प्रपद्ये ॥४२॥ स्मशानस्थि

जेत् ॥ २२ ॥ ऋषिरुवाच ॥ एवमुक्त्वा वचो देवी तूष्णीमासीत्कोऽत्र सा ।
इति श्रीदेवीकृतं रुद्रयामले ॥ अथ सरस्वतिसंक्रो लिख्यते ॥ अथ प्रांजलिं स
मादाय हरिः प्रोवाच वाक्यं कृतं ॥ २६ ॥ हरिरुवाच ॥ वरावरेण्यां ज
गदादिभूतां महासरस्वतीं चराचरधरां ॥ अनादिमाद्यां परमार्थ
रूपां त्वां विश्वयोनिं शरणं प्रपद्ये ॥ २५ ॥ एकामनेकां त्रिविधां सु
कार्यं सुकारिणीं सदसद्रूपवतीं च ॥ रूपामरूपां च सभावां त्वां भावरूपां
त्वां विश्वयोनिं शरणं प्रपद्ये ॥ २६ ॥ सर्वात्मिकां सर्वजगन्निवासां श्री
मन्महालक्ष्मिमनादिदेवीं ॥ शक्तिस्वरूपां च सभावरूपां त्वां वि
श्वयोनिं शरणं प्रपद्ये ॥ २७ ॥ कामानधाधिष्ठिमाद्यर्कं सभक्तां हीं

संब्रह्मानंदप्रदायकं ॥२७॥ श्रीदेव्युवाच ॥ स्तुत्यानयाचैतेब्रह्मन्
भक्तिभावसमन्विता ॥ तुष्टास्मि दीयतांदेव वरंसंतोषकारकं ॥२८॥
ब्रह्मोवाच ॥ तद्रूपेमनोदेवीहृदंभवतुसर्वदा ॥ एवमेववरःसा
लोऽत्तमोवीयतेमया ॥२९॥ सत्सकृच्चापिदेवकीर्तिर्जोद्रूंविधी
यतां ॥ येनकार्याणिसिद्ध्यंतिसाधकानांमहात्मनां ॥३०॥ श्रीदेव्यु
वाच ॥ सर्वदात्तेमनोदेवीकुलधर्मस्तुपूजिते हृदंभवतुमत्कृंच
प्रसादान्मेवरंतव ॥३१॥ सर्वसिद्धिप्रदंस्तोत्रंपरमानंददायकं।
विनाश्चलंकृतंवध्यस्तुत्वासैस्मृश्रातीनिच ॥३२॥ माहगाऽसीपावि
रोपानरकाचासतेतत्परः ॥ ममेवातापवापेनब्रह्मांबलामाजातर्मं।

किं त्वं ब्रह्मविद्याधिकारा वदेः पित्वा ब्रह्मत्वान् किंसारहीं वृपद्ये ॥ २२ ॥ सु
क्तं वदं वृणु भर्गो सरस्वती प्रातः स्नानं धात्र्युक्तं कर्म च सर्वाय ॥ वदंति ये
श्रद्धया भूतचित्ता स्तभोग्यमोदे सहसहस्रभंते ॥ २३ ॥ नतकथानिं
नदरिद्रतीं च आत्मादिवाव नचसंसलभंते ॥ तएव धत्याच्युत
एव द्रूपाः सर्वत्र मासंभवतीह तेकां ॥ २४ ॥ वदं आरण्यविरजं सु
धामपतत्त्वस्मृतं त्रयाणां ॥ तेषां पूर्वतिवृकट धृभाबांसत्वांसर्व
प्राणिनां रणे वृषद्ये ॥ २५ ॥ ऋषिरुवाच ॥ स्तुत्यानयावदका एया
सर्वसारस्वरूपया ॥ प्रसन्नाद्देवदेवकी महापूर्वा सरस्वती ॥ २६
आविर्भूत्वा महादेवी ब्रह्म संतोषकारिणी ॥ उवाच वचनं दि

६.
७१

स्त्वं तत्तारस्त्वं तत्त्वभूस्त्वं तेजलंस्त्वं तत्तेजस्त्वं तत्त्वायुस्त्वं तत्त्वमाकाशस्त्वं तत्त्वशब्दस्प
र्शस्त्वं तेरूपं च ते रसस्त्वं ते गंधस्त्वं ते प्राणस्त्वं ते॥ व्यानस्त्वं ते अपानस्त्वं ते उदा
नस्त्वं ते समानस्त्वं ते नागस्त्वं ते कूर्मस्त्वं ते कृकलस्त्वं ते देवदत्तस्त्वं ते
धनंजयस्त्वं ते भूतात्मा च ते तानात्मा च ते सर्वात्मा च ते समुचित्त
त्वयैव विनिविष्टता॥१८॥ यदा न चोऽद्भव नानि जीवाना हन
वि सृष्टा विवर्त्तीशः॥ त्वं चैकस्त्वतानावि सदाशिव स्वत्वमेव चासीदि
ति चाविद्या॥२०॥ कालं त्वं संसमासि जगत्त्रयाणां स्वभाववीर्यादिकं
च त्वमेव॥ त्वमेव विश्वं परमात्मनाशक्तिः नमामि तत्पादपदं सरस्व
ती॥२१॥ त्वं वेदवाणीनारविलं स्थवेदस्त्वंस॥ दशानि स्वत पार्वतिस

७१

श्रीकैनवद्याकिलतेशाभयाचन्यासेरभीभिः पतितोविशंभुः ॥१३॥ इकेशा
हामात्मकलार्थसिद्धिः स्वकिंशुकेवागपिविसिदुसदेवत् ॥ सत्यायसूर्य
रायमानिवासः सुपाशसनापिचयदासिद्धः ॥१४॥ नचावतेमाहिमा
नेवदामिसरस्वतीप्रायेतलोकमध्ये ॥ जानंतिरक्तंबुद्बुदाभसमतोयं
जडावयंवल्लहरीशसुरभोः ॥१५॥ तथैववाचावयसंवदामोजिह्वाव
शात्यातथैववाचजीवाः ॥ पश्यामहेत्वांहिमातरस्मेहाशुस्पशाममसाद्वा ।
त्वचिसंभूतायं ॥१६॥ स्वादंविदामस्तवशक्तियोगाय हीमहेतत्वयात्मा
महेशि ॥ गच्छामहेतवशक्तिप्रभावादानंदपुष्कोमतवसान्निवेशात् ॥१७
आत्मानमतस्त्वंत्वमेवासिदहत्वमेववैवंद्विपवेचतत्त्वाः ॥ त्वमेववैव
विपयुलदुसुरभः पारावरेबापरमात्वमेव ॥१८॥ रविश्वतेवंदमा

५.
१०

द्योतितनकंठहारांभाग्यैकलभ्यांवरकौपवज्रां ॥८॥ श्रीकंठक्षालित्रय
शोभमानेंदुखारतूर्यलकृतानुरूपां ॥ पेचारवासोभंतभूगहारां
सरस्वतीत्वांप्रणमामिदेवी ॥८॥ कलामसंज्ञामपकोटिनाशंवि
हारयंत्रांविमलैकशोभां ॥ स्वच्छावदातीस्फाटिकानुरूपांसरस्वती
त्वांप्रणमामिमातः ॥११॥ वाक्कामकायैःपरमैपवित्रैरमारमांगी
वरदाभदैवैः ॥ वीजिरमीमिः कापवीजपुंक्तौह्रींपुमायमपत्रिमिति
मंत्रराजः ॥११॥ एकंनचैकंनचपुंसकेनछायामधेकेनतपैव
लोकेः करांगलुहेत्रिः परमोत्रमायंविहोतिचाचानिचमाधकानां
१२॥ हव्येनवैश्वरवलपान्वसत्पापाविधात्वचाचतत्त्वेवकाचा

ध्वनः ॥२॥ दृष्ट्वा तं मुनिर्विनिहतं दारुणं देवकंटकं ॥ आजग्मुः परमा
नंदं ब्रह्माविष्णुमहेश्वराः ॥ देवीं स्तुत्वा समादाय गतेनालं स्वसंयु
तः ॥ आत्मा मादाय देवेशाः कर्तुं दर्शनमादरात् ॥४॥ बद्धांजलिः पुटाः
सर्वे तुष्टुवुः क्रमशः प्रभो ॥ लोकानां च हितार्थाय देवीं सत्वानि
वार्यविवाय ॥ ब्रह्मा सरस्वतीं स्तं लक्ष्मीस्तं जनार्दनः ॥ स्तं तथा
महाकाल्याः शंकरः स्वयमब्रवीत् ॥६॥ ब्रह्मोवाच ॥ आज्ञां पुरा
ला नमस्तां सनातनीं चतुर्भुजां पुस्तकमंदधारिणीं ॥ वराभया
भ्यां मनुजाभिहस्तां नमामि तां जाड्यजटाविनाशिनीं ॥७॥ स्वस्व
तीत्वा मनु नौमि वाचं वाचं वदाहं स्मरणाधिरूढां ॥ मुक्तामालां

६८

८०

४ज्ञां च त्वन्माहात्म्यं जपं तथा ॥ विसर्जनं न जानामि चंडिके त्वं द
मस्व मे ॥ १४ कामेश्वरि जगन्मातः सच्चिदानंदविग्रहे ॥ गृहाणा
र्चामिमां मत्कां प्रसीद करुणानिधे ॥ १५ ॥ गुह्यातिगुह्यगोप्त्री
त्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादात्त्वयि स्थि
ता ॥ १६ ॥ इति श्री मार्कंडेयपुराणे सावर्णिके मन्वंतरे श्रीदेवीमाहात्म्ये
देवीपूजाविधानं नाम सप्तदशोऽध्यायः ॥ १७ ॥ अथ देवीमहाकीलविद
तो [illegible] ऋषिरुवाच ॥ अनेककल्पपर्यन्तं भूयः किंचिदनुत्तमं ॥ तत्त्वमेत
त्सर्वस्य च न सिद्धिः कथ्यते ॥ १ ऋषिरुवाच ॥ भूय शृणु महा
भाग देवीमाहात्म्यमुत्तमं ॥ विना येन तत् वक्ष्यामि निर्जीवा नव्यवं

६८

अशौचादिकालःप्रज्ञातेत्रस्यमंडले॥ वाहनंपूजनेपद्माघ्रातंयेनचरा

चरं॥७॥ पंचप्रलापसंयुक्तोतामसींचैवपूजयेत्॥८॥ मविरुवाच

मार्कंडेयपुराणोक्तंदेवीमाहात्म्यमुत्तमं॥ यःपठेच्छृणुयाद्भक्त्यानस

मुक्तिर्नसंशयः॥९॥ अज्ञानाद्विस्मृतेर्भ्रांत्यायन्न्यूनमधिकंकृतं

विपरीतंतुतत्सर्वंक्षमस्वपरमेश्वरी॥१०॥ मंत्रहीनंक्रियाहीनं

भक्तिहीनंसुरेश्वरि॥ यत्तुन्नाश्मिनपादेदवित्तस्मात्वंकरदामवा(

११॥ पवसामस्त्याचनामोक्षातकायत्तक्रियादिशु॥ कृतंसंहरी

तोपात्तत्प्रसादात्परमेश्वरि॥१२॥ यददत्तंवदप्रश्नंईश्वरअंजनव

र्जितं॥ तत्सर्वंतवमातांदविप्रसादपरमेश्वरि॥१३॥ आवाहनंव

यपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये मन्त्ररहस्य नाम षोडशोऽध्याय ॥
॥ ऋषिरुवाच ॥ क्रमेण पूजयेद्देवीं पूजा या वामदक्षिणे ॥ मध्ये तु पू
जयेदूर्ध्व देवीं मातामहिता यथे ॥१॥ ज्योत्स्नया चित्ता लक्ष्मी नाम संसी
नाशिनी ॥ सत्त्वमूर्ति ददौ तान पिति पूजा विधे: फलं ॥२॥ ज्योमंड
लजा देवी चतुर्हस्तां वृजासना ॥ आदिब्रह्मणव संयुक्ता पूजा वेवम्प्रयत्न
तः॥३॥ तमो मंडलजां देवीं चंडिकां परमेश्वरीं ॥ अकारामपसंयुक्तां
पूजयेत विचक्षणा: ॥४॥ सत्त्व मंडलजा देवी तान मूर्ति भारतिः
गुरु प्रणव संयुक्ता देमा: पूजां तत्कारयेत ॥५॥ पूजा ते पूजयेद्वेवतत
तत्त्विमिथुनत्रयं ॥ त्रयमंत्र जपेत्कुर्दं पूजयेद्दादकात्रकं ॥६॥ पूजा

विशाललोचनानारीपीनोन्नतपयोधरान् ॥ चंद्रहासं च डमरुं शिरः

पात्रं च विभ्रती ॥ १८ ॥ एकवीरा कालरात्रिः सैवोक्ता कामदास्तुतिः ॥

तेजोमंडलदुर्दर्शा भ्रामरी चित्रकांतिभृत् ॥ २० ॥ चित्रानुलेपना देवी

चित्राभरणभूषिता ॥ चित्रभ्रमरपाणिः सा महामारीति गीयते

२१ ॥ मधाप्रतीतपापघ्नाधारणा कांतिरं च ॥ भजंति सा च तेनोलि

संचंडिकामानवस्त्व ॥ २२ ॥ इतितेमूर्तयोदेव्या व्याता वसुधाधि

पाजगन्मातुश्चंडिकायाः कीर्तितां कामधेनवः ॥ २३ ॥ इदं रहस्यं च पर

मं मनिवीर्यकं चित्रया ॥ आरव्यातं दिव्यमूर्तीनामभीष्टफलदाय

कं ॥ २४ ॥ देवीनां च तत तस्तर्वगुह्याद्गुह्यतरं वरं ॥ २५ ॥ इति श्रीमार्कंडे

गमं ॥१०॥ इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरं ॥ अधीयय इमं नित्यं
रक्तदंत्यावपुस्तवं ॥११॥ तं सा परिचरेद्देवी पतिं प्रियमिवांगना ॥ शाकंभरी
नीलवर्णा नीलोत्पलविलोचना ॥१२॥ गंभीरनाभिस्त्रिवलीविभूषिततनू
दरी ॥ सुकर्कशसमोत्तुंगवृत्तपीनघनस्तनी ॥१३॥ मुष्टिं शिलीमुखापूर्णं
कमलं कमलालया ॥ पुष्पपल्लवमूलादिफलाढ्यं शाकसंचयं ॥१४॥ काम्या
नंतरसैर्युक्तं क्षुत्तृण्मृत्युजरापहं ॥ कार्मुकं च स्फुरत्कांतिं बिभ्रती परमेश्व
री ॥१५॥ शाकंभरी शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥ उमा गौरी सती चंडी
कालिका सा च पार्वती ॥१६॥ विशोका दुष्टदमनी शमनी दुरितापदां
शाकंभरीं स्तुवन् ध्यायन् जपन् संपूजयन्नमन् ॥१७॥ अक्षय्यमश्नुते शीघ्र
मन्नपानरसान्वहन ॥ भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा ॥१८

कांबुजासना ॥ ३ ॥ पाशांकुशेतिकानामदेवीश्रीकामप्रदानघ ॥ तस्मात्व

त्वं वदस्वामिमिच्छामि सर्वपापवहं ॥ ४ ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते ना

त्र संशयः ॥ रक्तांबरा रक्तमाला रक्तसर्वांगभूषणा ॥ ५ ॥ रक्तायुधा रक्तने

त्रा रक्तकेशातिभीषणा ॥ रक्ततीक्ष्णनखा रक्तदशना रक्तदंष्ट्रिका ॥ ६ ॥

पतिं नारी चानुरक्ता देवी भक्तं भजेज्जनं वसुदेव विख्याता सा महाबु

गलस्तनी ॥ ७ ॥ दीर्घौ लंबावतिस्थूलौ तावतीव मनोरमौ ॥ कर्कशावति

कांतौ तौ सर्वानंदपयोनिधी ॥ ८ ॥ भक्तान्संपाययेद्देवी सर्वकामदु

घौ स्तनौ ॥ खड्गं पात्रं च मुसलं लांगलं च भर्तिसा ॥ ९ ॥ आख्याता रक्त

चामुंडा देवी योगेश्वरीति च ॥ अनया व्याप्तमखिलं जगत्स्थावरजं

दु०
६६

३६ ॥ प्रपतंतां प्रांजलिर्भूत्वा प्रणम्यारोप्य चात्मनि ॥ सुचिरं भावयेदेवीं चंडिकां
तन्मयो भवेत् ॥ ३७ ॥ एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरी ॥ भुक्त्वा भोगं य
थाकामं देवीसायुज्यमाप्नुयात् ॥ ३८ ॥ यो न पूजयते भक्त्या चंडिकां भक्त
वत्सलां ॥ भस्मीकृत्वास्य पुण्यानि निर्दहेत्परमेश्वरी ॥ ३९ ॥ तस्मात्पूज
य भूपाल सर्वलोकमहेश्वरी ॥ यथोक्तेन विधानेन चंडिकां सुखमाप्स्य
सि ॥ ४० ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे श्रीदेवीमाहात्म्ये वैकृतिकं
रहस्यं नाम पंचमोध्यायः ॥ ५ ॥ ऋषिरुवाच ॥ नंदा भगवती नाम या भविष्य
ति नंदजा ॥ सा स्तुता पूजिता नित्यं वशीकुर्याज्जगत्त्रयं ॥ १ ॥ कनकोत्तम
कांतिः सा सुकांतिकनकांबरा ॥ देवी कनकवर्णाभा कनकोत्तमभूषणा
२ ॥ कमलांकुशपाशाब्जैरलंकृतचतुर्भुजा ॥ इंदिरा कमला लक्ष्मीः सा श्रीरु

मन्वितैः ॥ २८ ॥ वामभागेग्रतो देव्याश्छिन्नशीर्षं महासुरं ॥ पूजयेन्माहिषं
येन प्राप्तं सायुज्यमीशया ॥ २९ ॥ दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरं
वाहनं पूजयेद्देव्या धृतं येन चराचरं ॥ ३० ॥ ततः कृतांजलिर्भूत्वा स्तु
वीत चरितैरिमैः ॥ कुर्यात्तु स्तवनं धीमांस्तस्या एकाग्रमानसः ॥ ३१ ॥ ए
केन वा मध्यमेन नैकेनेतरयोरिह ॥ चरितार्धं न च जपेज्जपंश्छिद्रमवा
प्नुयात् ॥ ३२ ॥ स्तोत्रमंत्रैः स्तुवीतेमां यदि वा जगदंबिकां ॥ प्रदक्षिणा नम
स्कारान्कृत्वा मूर्ध्नि कृतांजलिः ॥ ३३ ॥ क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतंद्रि
तः ॥ प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा ॥ ३४ ॥ जुहुयात्स्तोत्रमंत्रै
र्वा चंडिकायै शुभं हविः ॥ भूयो नामपदैर्देवीं पूजयेत्सुसमाहितः

दु.
६५

धिव ॥२१॥ दशाननाचाष्टभुजा दक्षिणोत्तरयोस्तदा ॥ कालमृत्युचसंपूज्यो
सर्वारिष्टप्रशांतये ॥२२॥ पंचाच्चाष्टभुजा पूज्या शुंभासुरनिवार्हणी ॥ नचा
स्याभान्तयः पूज्यास्तदाक्तद्विनायको ॥२३॥ नमोदेव्या इति स्तोत्रैर्महा
लक्ष्मीं समर्चयेत् ॥ अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयः ॥२४॥ अष्टा
दशभुजा चैव पूज्या महिषमर्दिनी ॥ महालक्ष्मीर्महाकाली सैव प्रोक्ता
सरस्वती ॥२५॥ ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥ महिषांतक
रीयेन पूजिता सजगत्प्रभुः ॥२६॥ पूजयेज्जगतां धात्रीं चंडिकां भक्तवत्स
लां ॥ अर्घ्यादिभिरलंकारैर्गंधपुष्पैस्तथाक्षतैः ॥२७॥ धूपैर्दीपैश्च नैवेद्यैर्ना
नाभक्ष्यसमन्वितैः ॥ रुधिराक्तेन बलिना मांसेन सुरया नृप ॥२८॥ प्रणा
माचमनीयेन चंदनेन सुगंधिना ॥ सकर्पूरैश्च तांबूलैर्भक्तिभावस

६५

१३॥ गौरीदेहात्समुद्भूता या सत्वैकगुणाश्रया॥ साक्षात्सरस्वती प्रोक्ता शुंभासु
रनिवर्हिणी॥१४॥ ददौ चाष्टभुजा बाणमुसले शूलचक्रभृत॥ शंखं घंटां लां
गुलं च कार्मुकं वसुधाधिप॥१५॥ एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति
निशुंभमथनी देवी शुंभासुरनिवर्हिणी॥१६॥ इत्युक्तानि स्वरूपाणि मू
र्तीनां तव पार्थिव॥ उपासनं जगन्मातुः पृथगासां निशामय॥१७॥ महा
लक्ष्मीर्यदा पूज्या महाकाली सरस्वती॥ दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथु
नत्रयं॥१८॥ विरंचिस्स्वरया मध्ये रुद्रो गौर्या च दक्षिणे॥ वामे लक्ष्म्या
हृषीकेशः पुरतो देवतात्रयं॥१९॥ अष्टादशभुजा मध्ये वामे चास्या द
शानना॥ दक्षिणेष्टभुजा लक्ष्मीर्ब्रह्माण्याद्यां पृथक्क्रमं॥२०॥ पूर्वोदि
तलनः पूज्यासितो गायत्र्यष्टभैरवाः॥ अष्टादशभुजा चैषा यदा पूज्या नरा

भ्यो याविर्भूताडुरस्वपा ॥ त्रिगुणा सा महालक्ष्मीः साक्षान्महिषम
र्दिनी ॥ ७ ॥ श्वेतानना नीलभुजा सुश्वेतस्तनमंडला ॥ रक्तमध्या रक्तपा
दा नीलजंघोरुरुन्मदा ॥ ८ ॥ सुचित्रजघना चित्रमाल्यंबरविभूषणा
चित्रानुलेपना कांतिरूपसौभाग्यशालिनी ॥ ९ ॥ अष्टादशभुजापूज्या
सा सहस्रभुजा सती ॥ आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्रमात्
१० ॥ अक्षमाला च कमलं बाणोसिः कुलिशं गदा ॥ चक्रं त्रिशूलं पर
शुः शंखो घंटा च पाशकः ॥ ११ ॥ शक्तिर्दंडश्चर्म चापं पानपात्रं कमं
डलुः ॥ अलंकृतभुजामेभिरायुधैः कमलासनां ॥ १२ ॥ सर्वदेवमयीमी
शां महालक्ष्मीमिमां नृप ॥ पूजयेत्सर्वलोकानां सदेवानां प्रभुर्भवेत्

श्रीदेवीमाहात्म्ये प्राधानिकरहस्यंनामचतुर्दशोऽध्यायः॥१४॥ ऋषिरुवाच॥

त्रिगुणातामसीदेवीसात्विकीयात्रिधोदिता॥ साशर्वाचंडिकादुर्गाभद्रा
भगवतीर्यते॥१॥ योगनिद्राहरेरुक्तामहाकालीतमोगुणा॥ मधुकैट
भनाशार्थंयांतुष्टावांबुजासना॥२॥ दशवक्त्रादशभुजादशपादांजन
प्रभा॥ विशालयाराजमानात्रिंशल्लोचनमालया॥३॥ स्फुरद्दशनदंष्ट्रा
साभीमरूपापिभूमिपा॥ रूपसौभाग्यकांतीनांसाप्रतिष्ठामहाश्रियः॥
४॥ खड्गबाणगदाशूलशंखचक्रकपालभृत्॥ परिघंकार्मुकंशीर्षं
निश्च्योतद्रुधिरंदधौ॥५॥ एषासावैष्णवीमायामहाकालीदुरत्य
या॥ आराधितावशीकुर्यात्पूजाकर्तुश्चराचरं॥६॥ सर्वदेवशरीरे

वेदीमुंदलौरूमगाक्षुमा ॥ २४ ॥ एताषु बनतपः सयः पुरुषं त्वंप्रवादरे
चतुष्कंतोनुपश्यंतिनेनदृष्टोदेजनाः ॥ २५ ॥ ब्रह्मलेला ब्रह्मदो वक्त्रीमि
हालक्ष्मीन पत्रपी ॥ रुद्रायणीतीकरतं वासुदेवा पचक्रिये ॥ २६ ॥ सत
पामहसंभूता विरिंचीऽमतोजनेत ॥ स्वमेद भगवान्रुद्रस्तत्कौर्या
सहवीर्यवान् ॥ २७ ॥ ब्रह्मांडमध्ये ब्रह्मादिकार्यजातमभूत्तव ॥ महा
भूतात्मके सर्वजगत्स्यापरं अंगमं ॥ २८ ॥ ब्रह्मवोध पालयामास त्वं क्षमा
सदेकेशव ॥ महालक्ष्मी महाराज जगत्सर्वं मयीश्वरी ॥ २९ ॥ निरा
कालचक्राकपास्वनानामिधानभृत्ता नामंतरैर्निरूप्य नाम्ना
नास्यनवेनचित ॥ ३० ॥ इति श्रीमार्कंडेयपुराणे आत्मभावमार्कं मन्वंतरे

ऽसौकमलाननो ॥१७॥ ब्रह्मान्विधिविरंचैवत्तिधान्तरिस्याहनंतरं ॥ श्री
वत्सकमलेलक्ष्मीस्याहमानासिद्धिंपंचतां ॥१८॥ महाकालीभारतीपि
श्वेनहजनोस्तुह ॥ एतत्स्योतविष्णुपाणि नामानिचवदामते ॥१९॥ नी
लकंठंरक्तवाहुश्चतांगंचंडस्तवरं ॥ जनयामासषुशंकमहालोऽह
तेप्रियं ॥२१॥ सहद्रुःशंकरः स्यामुकंवर्दीचत्रिलोचनः ॥ त्रिपी
ऽविद्याकामधेनुःसावित्रीभावादताश्वता ॥२२॥ सरस्वतीत्रिपंतो
रीकमलंचपुरुषंवन्नथ ॥ जनयामासनामानितेयोगाविवदामिते
२३ ॥ ऽविष्णुकृष्णोहृषीकेशोवासुदेवोजनार्दनः ॥ उमागौरीसती।

प्र॰ ८२

यामहाकालीमहामारीक्षुधातृषा॥ निद्रातृष्णाचैकवीराकालरात्रि
र्दुरत्यया॥१२॥ इमानितत्वनामानिप्रतिकार्याणितेमपा॥ एभिःक
र्माणितेज्ञात्वायोधीतेश्नुतेसुखं॥१३॥ तामित्युक्त्वामहालक्ष्मीःस्वरू
पमपरंनृप॥ सत्वाख्येनातिशुद्धेनगुणेनेंदुप्रभांददौ॥१४॥ अक्षमा
लांकुशधरावीणापुस्तकधारिणी॥ साबभूववरानारीनामान्यस्यै
चसाददौ॥१५॥ महाविद्यामहावाणीभारतीभाःसरस्वती॥ आ
र्याब्राह्मीकामधेनुर्वेदगर्भाचधीश्वरी॥१६॥ अथोवाचमहाल
क्ष्मीर्महाकालींसरस्वतीं॥ युवांजनयितांदेव्यौमिथुनेस्वानुरूपतः
॥१७॥ इत्युक्त्वातेमहालक्ष्मीःससर्जमिथुनंस्वयं॥ हिरण्यगर्भौरुचिरौस्त्री

८२

दारवढुं पानपार्श्वेचविश्रुती॥ नागलिंगंच यो।नैंचाविश्रुतीनवमुई
गेन॥५॥ तप्तकांचनवर्णाभातप्तकांचनभूषणा॥भूमंतदारविलेसेन
परमामासतेजसा॥६॥भूयंनदारविलेलोकाविलोक्यपरमेश्वरी॥र
भारूपमादिलैंतनमोक्तूवलेनहि॥७॥नामिन्नांजनसंकाशादंष्ट्रा
वितवदानना॥विशालेलाचनानारीविभवंतनुमध्यमा॥८॥दवष्ट्रा
वाऽऽशिरःस्वेटैरलंकृतचतुर्भुजा॥कवंधहाराशिरसः विभ्राणाहि
शिरःस्रजं॥९॥तोवाचमहालक्ष्मीतामसींप्रमदोत्तमं॥नामकर्म
चमेमातर्देहितुभ्यंनमोनमः॥१०॥तांप्रोवाचमहालक्ष्मीस्तामसींदि
मलोचनां॥ददातितवनामानि यानिकर्माणितानिते॥११॥महामा

६. दी

भवतु ॥ शिवदूत्याश्च माहात्म्यं वधः शुंभनिशुंभयोः ॥ रक्तबीजवध
श्चैव सर्वमेतच्छ्रावयितं ॥ २१ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके म
न्वंतरे श्रीदेवीमाहात्म्ये [illegible] ऽध्यायः ॥ ११ ॥
[illegible] ॥ राजोवाच ॥ भगवन्नेव तारामे चंडिका पालयत्यादिता: ॥ एतेश्लो
कास्तित्व [illegible] धानं वक्तुमर्हसि ॥ १ ॥ आराध्यं परमं यादृशाः स्तव
येनवै द्विज ॥ विधिना देवि सकलं यथावत्कथयस्व मे ॥ १ ॥ ऋषि
रुवाच ॥ इदं रहस्यं परमं अनाख्येयं प्रचक्षते ॥ भक्तोऽसीति मम श्रियं वि
त्ववाचाच्यं नराधिप ॥ ३ ॥ सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्व
री ॥ लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥ ४ ॥ मातुलिंगं ग

दि

हनमस्खलितंतवतत्रभविष्यति॥ मृतश्चभूयःसंप्राप्यजन्मदेवाद्वि
वस्वतः॥१४॥ सावर्णिकोमनुर्नामभवान्भुविभविष्यति॥ वैश्यवर्य
त्वयायश्चवरोस्मत्तोभिवांछितः॥१५॥ तंप्रयच्छामिसंसिद्ध्यैतव
ज्ञानंभविष्यति॥ मार्कंडेयउवाच॥ इतिदत्वातयोर्देवीयथाभि
लषितंवरं॥१६॥ बभूवांतर्हितासद्योभक्त्याताभ्यामभिष्टुता॥ ए
वंदेव्यावरंलब्ध्वासुरथःक्षत्रियर्षभः॥१७॥ सूर्याज्जन्मसमासाद्य
सावर्णिर्भवितामनुः॥ सावर्णिकामिदंसम्यक्प्रोक्तमन्वंतरंतव
१८॥ तथाचदेवीमाहात्म्यंमाहिषासुरघातने॥ उत्पत्तिर्याचवैदे
व्याःकान्तरूपांचतथाहवे॥१९॥ तथैवसंभवोदेव्याःकौशिकायायथापुरा

मर्द्दितां च क्रतुर्सौग्ध्यधूपाग्नितर्पणैः ॥ निराहारौ यतात्मानौ तन्
मनस्कौ समाहितौ ॥ ८ ॥ ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितं
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ ९ ॥ परितुष्टा जगद्धा
त्री प्रत्यक्षं प्राह चंडिका ॥ श्रीदेव्युवाच ॥ यत्प्रार्थ्यते त्वया भूप त्वया
च कुलनंदन ॥ १० ॥ मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि ते ॥ मा
र्कंडेय उवाच ॥ ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥ ११ ॥ अत्रैव
च निजं राज्यं हतशत्रुबलं बलात् ॥ सोपि वैश्यस्ततो ज्ञानं वव्रे
निर्विण्णमानसः ॥ १२ ॥ ममेत्यहमिति प्राज्ञः संगविच्युतिकारकं
देव्युवाच ॥ स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥ १३ ॥ हत्वारि

तन्मे । एवंप्रभावासादेवीययेदंधार्यतेजगत् ॥१॥ विद्यातथैवक्रि
यतेभगवद्विष्णुमायया ॥ तयात्वमेषवैश्यश्चतथैवान्येविवेकि
नः ॥२॥ मोह्यंतेमोहिताश्चैवमोहमेष्यंतिचापरे ॥ तामुपैहिमहा
राजशरणंपरमेश्वरीं ॥३॥ आराधितासैवनृणांभोगस्वर्गापवर्गदा
मार्कंडेयउवाच ॥ इतितस्यवचःश्रुत्वासुरथःसनराधिपः ॥४॥ प्रणि
पत्यमहाभागंतमृषिंसंशितव्रतं ॥ निर्विण्णोतिममत्वेनराज्यापह
रणेनच ॥५॥ जगामसद्यस्तपसेसचवैश्योमहामुने ॥ संदर्शना
र्थमंबायानदीपुलिनसंस्थिताः ॥६॥ सचवैश्यस्तपस्तेपेदेवी
सूक्तंपरंजपन् ॥ तौतस्मिन्पुलिनेदेव्याःकृत्वामूर्तिंमहीमयीं ॥७

सैवकालेमहामारीसैवसृष्टिर्भवत्यजा ॥ स्थितिंकरोतिभूतानांसै
वकालेसनातनी ॥३९॥ भवकालेनृणांसैवलक्ष्मीर्वृद्धिप्रदागृहे
सैवाभावेतदालक्ष्मीर्विनाशायोपजायते ॥४०॥ स्तुतासंपूजिता
पुष्पधूपगंधादिभिस्तथा ॥ ददातिवित्तंपुत्रांश्चमतिंधर्मेगतिं
शुभं ॥४१॥ इति श्रीमार्कंडेयपुराणेसावर्णिकमन्वंतरेश्रीदेवीमाहा
त्म्येफलानुकीर्तिनंनामद्वादशोध्यायः ॥१२॥ अथध्यानं ॥ मातर्नमा
मिकमलेकमलायताक्षिश्रीविष्णुहृत्कमलवासिनिविश्वमातः
क्षीरोदजेकमलकोमलगर्भगौरिलक्ष्मिप्रसीदसततंनमतांशरण्ये
॥१२॥ इतिध्यानं ॥ ऋषिरुवाच ॥ एतत्तेकथितंभूपदेवीमाहात्म्यमु

सिंघायादस्यवोवैरिणास्तथा ॥ २८ ॥ दूरादेवपलायंतेस्मरतश्चरितंम
म ॥ ऋषिरुवाच ॥ इत्युक्त्वासाभगवतीचंडिकाचंडविक्रमा ॥ पश्यतांम
वदेवानांतत्रैवांतरधीयत ॥ २९ ॥ तावपिदेवानिरातंकाःस्वाधिकारान्य
थापुरा ॥ यज्ञभागभुजःसर्वेचक्रुर्विनिहतारयः ॥ ३० ॥ जगद्विध्वंसके
तस्मिन्महोग्रेतुलविक्रमे ॥ निशुंभेचमहावीर्येशेषाःपातालमाययुः
३१ ॥ एवंभगवतीदेवीसानित्यापिपुनःपुनः ॥ संभूयकुरुतेभूपजग
तःपरिपालनं ॥ ३२ ॥ तयैतन्मोह्यतेविश्वंसैवविश्वंप्रसूयते ॥ साया
चिताचविज्ञानंतुष्टाऋद्धिंप्रयछति ॥ ३३ ॥ व्याप्तंतयैतत्सकलंब्र
ह्मांडंमनुजेश्वर ॥ महाकाल्यामहाकालीमहामारीस्वरूपया ॥ ३४

रेलपा ॥ २० ॥ प्रीतिर्न क्रियते साम्प्रिन्नकृच्छ्रचरितेष्कृते ॥ कृतं हरतिता
पापानित्तच्यातेग्यं प्रयच्छति ॥ २१ ॥ स्तौं किरीतिभूत्तन्येजनमां कीर्त्ति
तेमम ॥ पुष्कृष्टचरितं पन्येकुर्वे देत्यनवहर्यं ॥ २२ ॥ तस्मिन्नकृतेवैरि
कृतंभयंपुंसांनजायते ॥ युष्माभिर्स्तुतयोयाश्चयाश्चब्रह्मर्षिभिः कृता
२३ ब्रह्मणाचकृतातापातु प्रयच्छति शुभां मतिं ॥ अरण्ये प्रांतरे वापिदा
वाग्निपरिवारितः ॥ २४ ॥ दस्युभिर्वावृतः शून्येगृहीतो वापिशत्रुभिः
सिंहव्याघ्रानुयातोवावनेवावनहस्तिभिः ॥ २५ ॥ राज्ञाक्रुद्धेनचाज्ञप्तोवध्यो
वेधनगतोपिवा ॥ आघूर्णितोवावातेनस्थितः पोतेमहार्णवे ॥ २६ ॥ प
तत्सुचापिशस्त्रेषु संग्रामेभृशदारुणे ॥ सर्वबाधासुघोरासुवेदनाभ्या
र्दितोपिवा ॥ २७ ॥ स्मरन्ममैतच्चरितंनरोमुच्येतसंकटात् ॥ ममप्रभावा

त्म्यंतथाचोत्पत्तयः शुभा ॥ पराक्रमंच युद्धेषु जायते निर्भयः पुमा
न् ॥ १३ ॥ रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते ॥ नंदते च कुलं पुंसां
माहात्म्यं मम शृण्वतां ॥ १४ ॥ शांतिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ।
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १५ ॥ उपसर्गाः शमं यांति
ग्रहपीडाश्च दारुणाः दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ बा
लग्रहाभिभूतानां बालानां शांतिकारकं ॥ संघातभेदे च नृणां मैत्रीक
रणमुत्तमं ॥ १७ ॥ दुर्वृत्तानामशेषाणां बलहानिकरं परं ॥ रक्षोभूतपिशा
चानां पठनादेव नाशनं ॥ १८ ॥ सर्वं ममैतन्माहात्म्यं मम सन्निधिका
रकं ॥ पशुपुष्पार्घधूपैश्च गंधदीपैस्तथोत्तमैः ॥ १९ ॥ विप्राणां भोज
नैर्होमैः प्रोक्षणीयैरहर्निशं ॥ अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्स

यो यात्वकदाचित्तंभविष्यति ॥ ५ ॥ तस्मान्ममैतन्माहात्म्यं पठितंमम समा
हितैः ॥ श्रोतव्यंचसदा भक्त्या परंस्वस्त्ययनंमहत् ॥ ६ ॥ उपसर्गानशे
षांस्तुमहामारीसमुद्भवान् तथात्रिविधमुत्पातं माहात्म्यं शमये
न्मम ॥ ७ ॥ यत्रैतत्पठ्यते सम्यङ्नित्यमायतनेमम ॥ सदानतद्विमोक्ष्यामि
सान्निध्यं तत्रमेस्थितं ॥ ८ ॥ बलिप्रदाने पूजायामग्निकार्ये महोत्स
वे ॥ सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेवच ॥ ९ ॥ जानताजानता वापि
बलिंपूजांतथाकृतं प्रतीक्षिष्याम्यहंप्रीत्या वह्निहोमंतथाकृतं ॥ १०
शरत्कालेमहापूजाक्रियते याचवार्षिकी ॥ तस्यांममैतन्माहात्म्यं
श्रुत्वाभक्तिसमन्वितः ॥ ११ ॥ सर्वबाधाविनिर्मुक्तो धनधान्यसमन्वि
तः ॥ मनुष्यो मत्प्रसादेन भविष्यति नसंशयः ॥ १२ ॥ श्रुत्वाममैतन्मा

अथ ध्यानं ॥ यांबालदक्षार्कपरिमंडितनिमूर्त्तिरकोर्यसंहारहेतनास्थितिम-
सुरगैर्वृतांच ॥ देवीमनारत्यमजातमीश्वरंतांप्रपन्नाततांनोमिभार्गव-
श्रीधरमार्यरागी ॥ ४२ ॥ इति ध्यानं ॥ देव्युवाच ॥ एभिः स्तवैश्च मां नि-
त्यं स्तोष्यते यः समाहितः तस्याहं सकलां बाधां नाशयिष्याम्यसं-
शयं ॥ १ ॥ मधुकैटभनाशं च महिषासुरघातनं ॥ कीर्तयिष्यंति ये त-
द्वद्वधं शुंभनिशुंभयोः ॥ २ ॥ अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेत-
सः ॥ श्रोष्यंति चैव ये भक्त्या मम माहात्म्यमुत्तमं ॥ ३ ॥ न तेषां दुष्कृतं
किंचिद्दुष्कृतोत्था न चापदः ॥ भविष्यति न दारिद्र्यं न चैवेष्टवियो-
जनं ॥ ४ ॥ शत्रुतो न भयं तस्य दस्युतो वा न राजतः ॥ न शस्त्रानलतो

५६

मिदुर्गमाख्यंमहासुरं॥४६॥दुर्गादेवीतिविख्यातंतन्मेनामभविष्यति
पुनश्चाहंयदाभीमंरूपंकृत्वाहिमाचले॥४७॥रक्षांसिभक्षयिष्यामिमु
नीनांत्राणकारणात्॥तदामांमुनयःसर्वेस्तोष्यन्त्यानम्रमूर्त्तयः॥४८॥भी
मादेवीतिविख्यातंतन्मेनामभविष्यति॥यदारुणाख्यस्त्रैलोक्येमहाबा
धांकरिष्यति॥४९॥तदाहंभ्रामरंरूपंकृत्वासंख्येयषट्पदं॥त्रैलोक्यस्य
हितार्थायवधिष्यामिमहासुरं॥५०॥भ्रामरीतिचमांलोकास्तदा
स्तोष्यंतिसर्वतः॥इत्थंयदायदाबाधादानवोत्थाभविष्यति॥५१॥त
दातदावतीर्याहंकरिष्याम्यरिसंक्षयं॥५२॥इति श्रीमार्कंडेयपुराणेसा
वर्णिकेमन्वंतरेश्रीदेवीमाहात्म्येनारायणीस्तुतिर्नामैकादशोध्यायः

५६

नी ॥४२॥ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥ अवतीर्य हनिष्यामि
वैप्रचित्तांश्च दानवान् ॥४३॥ भक्षयंत्याश्च तानुग्रान्वैप्रचित्तान्महासुरा
न् ॥ रक्ता दंता भविष्यंति दाडिमीकुसुमोपमाः ॥४४॥ ततो मां देवताः स्वर्गे
मर्त्यलोके च मानवाः ॥ स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकां ॥४५॥ भू
यश्च शतवार्षिक्यामनावृष्ट्यामनंभसि ॥ मुनिभिः संस्तुता भूमौ संभ
विष्याम्ययोनिजा ॥४६॥ ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनी
न् ॥ कीर्तयिष्यंति मनुजाः शताक्षीमिति मां ततः ॥४७॥ ततोहमखिलं
लोकमात्मदेहसमुद्भवैः ॥ भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः
४८ ॥ शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि ॥ तत्रैव च वधिष्यामि

६ ५५

श्रया ये त्वयि भक्तिनम्रा ॥ ३४ ॥ देवि प्रसीद परिपालय नोरिभीतेर्नित्यं
यथासुरवधादधुनैव सद्यः ॥ पापानि सर्वजगतां प्रशमं नयाशु मुत्पात
पाकजनितांश्च महोपसर्गान् ॥ ३६ ॥ प्रणतानां प्रसीद त्वं देवि विश्वार्त्तिहा
रिणि ॥ त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥ ३५ ॥ देव्युवाच ॥ वर
दाहं सुरगणा वरं यन्मनसेच्छथ ॥ तं वृणुध्वं प्रयच्छामि जगतामुपकार
कं ३८ ॥ देवा ऊचुः ॥ सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरी ॥ एवमेव त्व
या कार्यमस्मद्वैरिविनाशनं ३९ ॥ देव्युवाच ॥ वैवस्वतेंतरे प्राप्ते अष्टाविं
शतिमे युगे ॥ शुंभो निशुंभश्चैवान्यावुत्पत्स्येते महासुरौ ४० ॥ नंदगोपगृ
हे जाता यशोदागर्भसंभवा ॥ ततस्तौ नाशयिष्यामि विंध्याचलनिवासि ५५

रत्नवस्त्रावकचर्चितलोकेरुज्वल ॥ कुमायरवड्गो भवतु चंडिके त्वां नन्ताव पै २८
रोमान नक्षेबानु वहसि त्रुष्टः रूपान्तु कामात्मिकलानभीष्टान ॥ त्वामाश्रिता नां
न विपन्नराणां ॥ त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥ २८ ॥ एतत्कृतं यत्कदनं त्वया
द्य धर्मद्विषां देवि महासुराणां ॥ रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वाम्बिके तत्
प्रकरोति कान्या ॥ २० ॥ विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का
त्वदन्या ॥ ममत्वगर्तेऽतिमहान्धकारे विभ्रामयत्येतदतीव विश्वं ॥ २१ ॥
रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र ॥ दावानलो यत्र त
थाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वं ॥ २२ ॥ विश्वेश्वरी त्वं परिपासि
विश्वं विश्वात्मिका धारयसीति विश्वं ॥ विश्वेशवंद्या भवती भवन्ति विश्वा

दु॰
५८

शिवदूतीस्वरूपेण हतदैत्यमहाबले ॥ घोररूपेमहारावेनारा ॥२०॥ दंष्ट्रा
करालवदनेशिरमालाविभूषिणे ॥ चामुंडेमुंडमथनेनारा ॥२१॥ लक्ष्मिल
ज्जेमहाविद्ये श्रद्धेपुष्टिस्वधेध्रुवे ॥ महारात्रिर्महाविद्येनारा ॥२२॥ मेधे
सरस्वतिवरेभूतिबाभ्रवितामसि ॥ नियतेत्वंप्रसीदेशेनारा ॥२३॥ सर्व
तःपाणिपादान्तेसर्वतोक्षिशिरोमुखे ॥ सर्वतःश्रवणघ्राणेनारा ॥२४॥
सर्वस्वरूपेसर्वेसेसर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहिनोदेविदुर्गेदेवि
नमोस्तुते ॥२५॥ एतत्तेवदनंसौम्यंलोचनत्रयभूषितं ॥ पातुनःसर्वभी
तिभ्यःकात्यायनिनमोस्तुते ॥२६॥ ज्वालाकरालमत्युग्रमशेषासुरसूदनं
त्रिशूलंपातुनोभीतेर्भद्रकालीनमोस्तुते ॥२७॥ हिनस्तिदैत्यतेजांसिस्व
नेनापूर्ययाजगत् ॥ साघंटापातुनोदेविपापेभ्योनःसुतानिव ॥२८॥ असु

सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नार ॥ ९ ॥ सृ
ष्टिस्थितिविनाशानां शक्तिभूते सनातनि ॥ गुणाश्रये गुणमये नार ॥ १० ॥ श
रणागतदीनार्त्तपरित्राणपरायणे ॥ सर्वस्यार्त्तिहरे देवि नारा ॥ ११ ॥ हंसयुक्त
विमानस्थे ब्रह्माणीरूपधारिणि ॥ कौशांभःक्षरिके देवि नारा ॥ १२ ॥ त्रिशू
लचंद्राहिधरे महावृषभवाहिनी ॥ माहेश्वरीस्वरूपेण नारा ॥ १३ ॥ म
यूरकुक्कुटवृते महाशक्तिधरेऽनघे ॥ कौमारीरूपसंस्थाने नारा ॥ १४ ॥ श
ङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥ प्रसीद वैष्णवीरूपे नारा ॥ १५ ॥ गृ
हीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे ॥ वाराहरूपिणि शिवे नारा ॥ १६ ॥ नृ
सिंहरूपेणोग्रेण हंतुं दैत्यान्कृतोद्यमे ॥ त्रैलोक्यत्राणसहिते नारा
१७ ॥ किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ॥ वृत्रप्राणहरे चैंद्रि नारा १८

तर्जगतोखिलस्य॥ प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चरा
चरस्य॥२॥ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि॥
अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये॥३॥ त्वं वैष्ण
वी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया॥ संमोहितं देवि सम
स्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः॥४॥ विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु॥ त्वयैकया पूरितमंबयैतत्का ते स्तुतिः स्त
व्यपरापरोक्तिः॥५॥ सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी॥ त्वं स्तुता स्
तुतये का वा भवंति परमोक्तयः॥६॥ सर्वस्य बुद्धिरूपेण जनस्य हृदि सं
स्थिते॥ स्वर्गापवर्गदे देवि नारायणि नमोस्तु ते॥७॥ कलाकाष्ठादिरूपे
ण परिणामप्रदायिनी॥ विश्वस्योपरतौ शक्ते नारायणि नमोस्तु ते॥८॥

मानसः ॥२६॥ वसुर्वर्निहन्तनास्मिन् गंधर्वा ललितं जगुः ॥ अवादयंस्तथै
वान्ये ननृतुश्चाप्सरोगणाः ॥२७॥ ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवा
करः ॥ जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः ॥२८॥ इति श्री मार्क
ण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये भगवतीनाम दशमो
ध्यायः ॥१०॥ अथ ध्यानं ॥ ज्वालापर्वतसंस्थितां त्रिनयनां पीतवस्त्र पा
रिधृतां ॥ ज्वालाडंबरभूषणां हवदनां नित्यां सहस्रांजनैः ॥ वहुच
क्रौंचभुजंगमधग्रीवा धरां भोजाभया विभ्रतीं चिद्रूपां सकलार्थदीपनकरीं
ज्वालामुखीं नौम्यहं ॥११॥ इति ध्यानं ॥ ऋषिरुवाच ॥ देव्या हतेन तत्र महा
सुरेन्द्रे सेंद्राः सुरा वह्निपुरोगमास्तां ॥ कात्यायनीं तुष्टुवुरिष्टलाभाद्विका
शिवक्त्राश्च विकाशिताशाः ॥१॥ देवि प्रपन्नार्त्तिहरे प्रसीद प्रसीद मा

थमं युद्धं मुनिविस्मयकारकं ॥ ततो नियुद्धं सुचिरं कृत्वा तेनांबिका
सह ॥ २० ॥ उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥ स क्षिप्तो धरणीं
प्राप्य मुष्टिमुद्यम्य वेगवान् ॥ २१ ॥ अभ्यधावत दुष्टात्मा चंडिकानिधने
च्छया ॥ तमायांतं ततो देवी सर्वदैत्यजनेश्वरं ॥ २२ ॥ जगत्यां पातयामा
स भित्वा शूलेन वक्षसि ॥ स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः
२३ ॥ चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वतां ॥ ततः प्रसन्नम
खिलं हते तस्मिन्दुरात्मनि ॥ २४ ॥ जगत्स्वास्थ्यमतीवाप निर्मलं चा
भवन्नभः ॥ उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ॥ २५ ॥ सरितो
मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥ ततो देवगणाः सर्वे हर्षनिर्भर

तैः। प्रीतैर्विरावैश्च सचार्ककरामलं ॥१३॥ अथ चाश्वान् पातयामास र
थं सारथिना सह ॥ हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ॥
१४॥ जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः ॥ चिच्छेदापततस्तस्य
मुद्गरं निशितैः शरैः ॥१५॥ तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगा
वान् ॥ स मुष्टिं पातयामास हृदये दैत्यपुंगवः ॥१६॥ देव्यास्तं चापि
सा देवी तलेनोरस्यताडयत् ॥ तलप्रहाराभिहतो निपपात मही त
ले ॥१७॥ स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥ उत्पत्य च प्रगृह्यो
च्चैर्देवीं गगनमास्थितः ॥१८॥ तत्रापि सा निराधारा युयुधे तेन
चंडिका ॥ नियुद्धं खे तदा दैत्यश्चंडिका च परस्परं ॥१९॥ चक्रतुः प्र

५॰
५१

णां ॥ ६ ॥ शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥ ततो युद्धमभू-
द्भूयः सर्वलोकभयंकरं ॥ ७ ॥ दिमान्यस्त्राणि शतशो मुमुचे यान्य-
थांबिका ॥ बभंज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः ॥ ८ ॥ मुक्तानि
तेन चास्त्राणि दिव्यानि परमेश्वरी ॥ बभंज लीलयैवोग्रहुंकारोच्चा-
रणादिभिः ॥ ९ ॥ ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ॥ सापि
तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ १० ॥ छिन्ने धनुषि दैत्येंद्रस्त-
था शक्तिमथाददे ॥ चिच्छेद देवी चक्रेण तामप्यस्य करे स्थितां ॥ ११ ॥
ततः खड्गमुपादाय शतचंद्रं च भानुमत् ॥ अभ्यधावत्तदा देवीं दैत्या-
नामधिपेश्वरः ॥ १२ ॥ तस्यापतत एवाशु खड्गं चिच्छेद चंडिका ॥ धनुर्मु-

नत्रयुक्तां। स्मेरमुखींवरदांकुशपाशाभीतिकरीं प्रभजेभवनेशीं ॥१॥
इति ध्यानं॥ ऋषिरुवाच॥ निशुंभं निहितं दृष्ट्वा भ्रातरं प्राणसंमि
तं॥ हन्यमानं बलंचैव शुंभः क्रुद्धोऽब्रवीद्वचः॥१॥ बलावलेपाद्दुष्टेत्व
मा दुर्गे गर्वमावह॥ अन्यासां बलमाश्रित्य युध्यसे यातिमानिनी
॥२॥ देव्युवाच॥ एकैवाहं जगत्यत्र द्वितीया का ममापरा॥ पश्यैता दुष्ट
मय्येव विशंत्यो मद्विभूतयः॥३॥ ऋषिरुवाच॥ ततः समस्तास्ता
देव्यो ब्रह्माणीप्रमुखा लये॥ तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबि
का॥४॥ देव्युवाच॥ अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता॥ तत्सं
हृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव॥५॥ ऋषिरुवाच॥ ततः प्रवव
तृते युद्धं देव्याः शुंभस्य चोभयोः॥ पश्यतां सर्वदेवानामसुराणां च दारु

ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान्॥ असुरांस्तांस्तथा काली शि
वदूती तथापरान्॥३५॥ कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः॥
ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृताः॥३६॥ माहेश्वरीत्रिशूलेन
भिन्नाः पेतुस्तथापरे॥ वाराहीतुंडघातेन केचिच्चूर्णीकृता भुवि॥३७॥
खंडं खंडं च चक्रेण वैष्णव्या दानवाः कृता॥ वज्रेण चैंद्रीहस्ताग्रविमु
क्तेन तथापरे॥३८॥ केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात्॥ भक्षि
ताश्चापरे कालीशिवदूतीमृगाधिपैः॥३९॥ इति श्रीमार्कंडेयपुरा
णे सावर्णिके मन्वंतरे श्रीदेवीमाहात्म्ये निशुंभवधो नाम नवमोध्या
यः॥९॥ अथ ध्यानं॥ उद्यद्दिनद्युतिमिंदुकिरीटां तुंगकुचां नय

णं तथा ॥२७॥ धनुर्मुक्तैर्बाणा बाहूनामयुतं दनुजेश्वरः ॥ चक्रायुधेन दितिज

श्छादयामास चंडिकां ॥२८॥ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ॥ चि

च्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥२९॥ ततो निसुंभो वेगेन

गदामादाय चंडिकां ॥ अभ्यधावत वै हंतुं दैत्यसेनासमावृता ॥३०॥ त

स्यापतत एवाशु गदां चिच्छेद चंडिकां ॥ खड्गेन शितधारेण स च शूलं स

मादद ॥३१॥ शूलहस्तं समायांतं निसुंभममरार्दनं ॥ हृदि विव्याध शूलेन

वेगाविद्धेन चंडिकां ॥३२॥ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोप

रः ॥ महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥३३॥ तस्य निष्क्रामतो

देवी प्रहस्य स्वनवत्ततः ॥ शिरश्चिच्छेद खड्गेन ततोसावपतद्भुवि ॥३४॥

ताडयत् ॥ कराभ्यांतन्निनादेन प्राक्स्वनास्तेतिरोहिताः ॥२०॥ अट्टाट्टहासमशि
वंशिवदूती चकारह ॥ तैः शब्दैरसुरास्त्रेसुः शुंभः कोपंपरंययौ ॥२१॥ दुरात्मंस्तिष्ठ
तिष्ठेति व्याजहारांबिकायदा ॥ तदाजयेत्यभिहितं देवैराकाशसंस्थितैः ॥२२
शुंभेनागत्य याशक्तिर्मुक्ताज्वालातिभीषणा ॥ आयांतीवह्निकूटाभा सानि
रस्तामहोल्कया ॥२३॥ सिंहनादेन शुंभस्य व्याप्तंलोकत्रयांतरं ॥ निर्घातनिः
स्वनोघोरो जितवानवनीपते ॥२४॥ शुंभमुक्तांशरान्देवी शुंभस्तत्प्रहितांच्छ
रान् ॥ चिच्छेद स्वशरैरुग्रैः शतशोथसहस्रशः ॥२५॥ ततः साचंडिकाक्रुद्धा
शूलेनाभिजघानतं ॥ सतदाभिहतोभूमौ मूर्छितोनिपपातह ॥२६॥ ततो
निशुंभः संप्राप्यचेतनामात्तकार्मुकः ॥ आजघानशरैर्देवीं कालींकेसरि

सापि देव्यास्त्रिशूलेन भिन्ना भूमौ समागता ॥१३॥ ततः परशुहस्तं तमायां
तं दैत्यपुंगवा ॥ आहत्य देवी बाणौघैरपातयत भूतले ॥१४॥ तस्मिन्नि
पतिते भूमौ निशुंभे भीमविक्रमे । भ्रातर्यतीव संक्रुद्धः प्रययौ हंतु
मंबिका ॥१५॥ स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ॥ भुजैरष्टाभिर
तुलैर्व्याप्याशेषं बभौ नभः ॥१६॥ तमायांतं समालोक्य देवी शंखमवा
दयत् ॥ ज्याशब्दं चापि धनुषश्चकारातीव दुःसहं ॥१७॥ पूरयामास
ककुभो निजघंटास्वनेन च ॥ समस्तदैत्यसैन्यानां तेजोवधविधा
यिना ॥१८॥ ततः सिंहो महानादैस्त्याजितेभमहामदैः ॥ पूरयामा
स गगनं गां तथैव दिशो दश ॥१९॥ ततः काली समुत्पत्य गगनं क्ष्माम

ततो युद्धमतीवासीद्देव्या शुंभनिशुंभयोः॥ शरवर्षमतीवोग्रं मेघ
योरिव वर्षतोः॥७॥ चिच्छेदास्तांश्शरांस्ताभ्यां चंडिका स्वशरोत्करैः॥
ताडयामास चांगेषु शस्त्रौघैरसुरेश्वरौ॥८॥ निशुंभो निशितं खड्
गं चर्म चादाय सुप्रभं॥ अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमं॥९॥ ता
डिते वाहने देवी क्षुरप्रेणासिमुत्तमं॥ निशुंभस्याशु चिच्छेद चर्म चा
प्यष्टचंद्रकं॥१०॥ छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः॥ ता
मप्यस्य द्विधा चक्रे चक्रेणाभिमुखागतां॥११॥ कोपाध्मातो निशुं
भोथ शूलं जग्राह दानवः॥ आयांतं मुष्टिपातेन देवी तच्चाप्य
चूर्णयत्॥१२॥ आविध्याथ गदां सोपि चिक्षेप चंडिकां प्रति॥

ट ॥ इति ध्यानं ॥ राजोवाच ॥ विचित्रमिदमाख्यातं भगवन्भवता मा
म ॥ देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितं ॥ १ ॥ भूयश्चेच्छाम्य
हं श्रोतुं रक्तबीजे निपातिते ॥ चकार शुंभो यत्कर्म निशुंभश्चाति
कोपितः ॥ २ ॥ ऋषिरुवाच ॥ चकार कोपमतुलं रक्तबीजे निपातिते
शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे ॥ ३ ॥ हन्यमानं महासैन्य
ऽविलोक्यामर्षमुद्वहन् ॥ अभ्यधावन्निशुंभोऽथ मुख्ययासुरसेन
या ॥ ४ ॥ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ॥ संदष्टौष्ठपु
टाः क्रुद्धा हंतुं देवीमुपाययुः ॥ ५ ॥ आजगाम महावीर्यः शुंभोऽपि
स्वबलैर्वृतः ॥ निहंतुं चंडिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥ ६ ॥

रिष्टिभिः॥६२॥ जघान रक्तबीजं तं चामुंडापीतशोणितं॥ स प
पात महीपृष्ठे शस्त्रसंघसमाहतः॥६३॥ नीरक्तश्च महीपाल
रक्तबीजो महासुरः॥ ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप॥६४॥ ते
षां मातृगणो जातो ननर्तासृङ्मदोद्धतः॥६५॥ इति श्रीमार्कं
डे पुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये रक्तबीजवधो
नामाष्टमोऽध्यायः॥८॥ अथ ध्यानं॥ श्री श्रीशैलेस्थिता या प्रहसि
तवदना पार्वती शूलहस्ता वह्न्यर्केंदुनेत्रा त्रिभुवनजननी
षड्भुजा सर्वशक्तिः॥ शांडिल्येनोपनीता जयतु भगवती भक्तिग
म्या नतानां सार्कसंहाहननस्याप्यपमत्तपतलदाशारदाऽव्ययसन्ना

रान् ॥ रक्तबिंदोप्रतिछस्त्वंवक्त्रेणानेनवेगिना ॥ ५७ ॥ भक्षयंतीच
संग्रामेतदुत्पन्नान्महासुरान् ॥ एवमेषक्षयंदैत्याः क्षीणरक्तोग
मिष्यति ॥ ५८ ॥ भक्षमाणास्त्वयाचोग्रानचोत्पत्स्यंतिचापरे ॥ इत्यु
क्त्वातांततोदेवीशूलेनाभिजघानतं ॥ ५९ ॥ मुखेनकालीजगृहे
रक्तबीजस्यशोणितं ॥ ततोसावाजघानाथगदयातत्रचंडिकां
॥ ६० ॥ नचास्यावेदनांचक्रेगदापातोल्पिकामपि ॥ तस्याहतस्य
देहात्तुबहुसुस्रावशोणितं ॥ ६१ ॥ यतस्ततस्तद्वक्त्रेणचामुंडासंप्र
तीछति ॥ मुखेसमुद्गतायेस्यारक्तपातान्महासुराः ॥ ६२ ॥ तांश्चखा
दाथचामुंडापपौतस्यचशोणितं ॥ देवीशूलेनवज्रेणबाणैरसिभि

वैस्नवीसमरेचैनंचक्रेणाभिजघानह ॥ गदयाताडयामासऐंद्रीतमसु
रेश्वरं ॥४६॥ वैस्नवीचक्रभिन्नस्यरुधिरस्रावसंभवः ॥ सहस्रसोज
ग्व्याप्तंतत्प्रमाणैर्महासुरैः ॥४७॥ सक्त्याजघानकौमारीवाराहीचतथा
ना ॥ माहेस्वरीत्रिशूलेनरक्तवीजंमहासुरं ॥४८॥ सचापिगदयादै
त्यः सर्वाएवाहनत्पृथक ॥ मातृकोपसमाविष्टोरक्तवीजोमहा
सुरः ॥४९॥ तस्याहतस्यबहुधाशक्तिशूलादिभिर्भुवि ॥ पपातयो
वैरक्तौघस्तेनासंछतशोसुराः ॥५०॥ तैश्चासुरासृक्संभूतैरसुरैः
सकलंजगत् ॥ व्याप्तमासीत्ततोदेवाभयमाजग्मुरुत्तमं ॥५१॥ तान्
विषण्णान्सुरान्दृष्ट्वाचंडिकाप्राहसत्वरा ॥ उवाचकालींचामुंडे
विस्तीर्णंवदनंकुरु ॥५२॥ मच्छस्त्रपातसंभूतान्रक्तविंदून्महासु

परान्दृष्ट्वादैत्यान्मातृगणार्दितान् ॥ योद्धुमभ्याययौक्रुद्धोरक्तवीजोमह
हासुरः ॥ ३९ ॥ रक्तविंदुर्यदाभूमौपतत्यस्यशरीरतः ॥ समुत्पततिमेद
न्यांतत्प्रमाणोमहासुरः ॥४०॥ युयुधेसगदापाणिरिंद्रशक्त्यामहासुरः
ततश्चैंद्रीस्ववज्रेणरक्तवीजमताडयत् ॥४१॥ कुलिशेनाहतस्याशुव
हुसुस्रावशोणितं ॥ समुत्तस्थुस्ततोयोधास्तद्रूपास्तत्पराक्रमाः ॥४२॥
यावंतःपतितास्तस्यशरीराद्रक्तविंदवः ॥ तावंतःपुरुषाजातास्तद्वी
र्यवलविक्रमाः ॥४३॥ तेचापियुयुधुस्तत्रपुरुषारक्तसंभवाः ॥ स
मंमातृभिरत्युग्रशस्त्रपातातिभीषणं ॥४४॥ पुनश्चवज्रपातेनक्ष
तमस्यशिरोयदा ॥ ववाहरक्तंपुरुषास्ततोजाताःसहस्रशः ॥४५॥

सदृष्ट्वातांततोदेवींतुहिनाचलसंस्थितां॥ जगादोच्चैः प्रयाहीतिमू
लंसुंभनिसुंभयोः॥६॥ नचेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति
ततोवलान्नयाम्येषकेशाकर्षणविह्वलां॥७॥ देव्युवाच॥ दैत्ये
श्वरेणप्रहितोवलवान्वलसंवृतः॥ वलान्नयसिमामेवंततःकिं
तेकरोम्यहं॥८॥ ऋषिरुवाच॥ इत्युक्तःसोभ्यधावत्तामसुरोधूम्र
लोचनः॥ हुंकारेणैवतंभस्मसाचकारांविका ततः॥९॥ अथक्रु
द्धंमहासैन्यमसुराणांतथांविका॥ ववर्षसायकैस्तीक्ष्णैस्तथाशक्तिप
रश्वधैः॥१०॥ ततोधुतसटःकोपात्कृत्वानादंसुभैरवं
पपातासुरसेनायांसिंहोदेव्याःस्ववाहनः॥११॥ कांश्चित्करप्र

स्येन चापरान् ... चाधरेणान्यान्स जघान मह
सुरान् ॥१२॥ केषांचित्पाटयामास नखैः कोष्ठानि केसरी ॥ तथा तल
प्रहारेण शिरांसि कृतवान्पृथक् ॥१३॥ विछिन्नबाहुशिरसा कृता
स्तेन तथापरे ॥ पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥१४॥ क्षणे
न तद्बलं सर्वं क्षयं नीतं महात्मना ॥ तेन केसरिणा देव्या वाहनेनाति
कोपिना ॥१५॥ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनं ॥ बलं च क्ष
यितं कृत्स्नं देवीकेसरिणा ततः ॥१६॥ चुकोप दैत्याधिपतिः शुंभः
प्रस्फुरिताधरः ॥ आज्ञापयामास च तौ चंडमुंडौ महासुरौ ॥१७॥
हे चंड हे मुंड बलैर्बहुलैः परिवारितौ ॥ तत्र गच्छत गत्वा च सा समानी

भविनिसंभयोः ॥७३॥ मन्येषामपि दैत्यानां सर्वे देवा नवग्रहाः ॥ तिष्ठंति
सन्मुखे वदन्माः ॥ किं पुनस्त्री त्वमकिंचिका ॥७४॥ इत्युक्त्वाह कृता देवा सस्यु
र्धेत्तं नमेस्तु ते ॥ संभाषीनां कथं तत्रोत्र्वी पृथासस्वस्ति सन्मुखं ॥७५॥ सात्वं
गच्छ मयैवाज्ञाकार्य्येषु संभवनि भयोः ॥ कृष्णाकर्षणानिर्दृत्ता गोरवामाग
मिष्यति ॥ ७६ ॥ देव्युवाच ॥ एवमेतद्वलीसंभाव निसुंभध्वात्तवीर्यवान्
ऽर्थं केशापि भ्रान्तितामेषदर्कालोन्यचिंताकुला ॥७७॥ सात्वं गच्छ मयैवाज्ञां प
दत्तसर्वमादित्ताः ॥ तदा च व्यासुरंग्र यस्य चभुजं केकरोतु तत्र ॥७८॥
इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे श्रीदेवीमाहात्म्ये दूतसंवादेना
म पंचमोध्यायः ॥५॥ ५॥ अथ ध्यानं ॥ सम्मत्रिशूलकरवालमेदशंखचक्रा

न्यां शंखखेटकधनुः परितर्जनीयः ॥ ध्येन्महामहिषदानववक्षसं
सौंदर्यकांतिनिभ डारितेंदुः खहरं नमामि ॥१॥ इति ध्यानं ॥ ऋषिरुवाच
इत्याकर्ण्य वचो देव्याः स दूतोमर्षपूरितः ॥ समाचष्ट समागम्य ।
दैत्यराजाय विस्तरात् ॥१॥ तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनं ॥२॥ हे धूम्रलोचनाशु
त्वं स्वसैन्यपरिवारितः ॥ तामानय बलाद्दुष्टां केशाकर्षणविह्वलां
३ ॥ तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेपरः ॥ स हंतव्योमरो वा
पि यक्षो गंधर्व एव च ॥४॥ ऋ. षिरुवाच ॥ तेनाज्ञप्तस्ततः शीघ्रं स
दैत्यो धूम्रलोचनः ॥ वृतः षष्ठ्या सहस्राणामसुराणां द्रुतं ययौ ॥५

३८

पादेनाक्रम्यकंठे च मूलेनैनमताडयत ॥११॥ तैर्मुक्तानिचशस्त्राणि
तथास्त्राणिमहासुरैः ॥ मुखेनजग्राहरुषादशनैर्मथितान्यपि ॥१२॥ ब
लिनांतद्बलंसर्वमसुराणांदुरात्मनां ॥ ममर्दाभक्षयच्चान्यानन्यां
श्चाताडयत्तथा ॥१३॥ असिनानिहताःकेचित्केचित्खट्वांगताडिताः
जग्मुर्विनाशमसुरादंताग्राभिहतास्तथा ॥१४॥ क्षणेनतद्बलंसर्वम
सुराणांनिपातितं ॥ दृष्ट्वाचंडोभिदुद्राव तांकालीमतिभीषणां ॥१५॥
शरवर्षैर्महाभीमैर्भीमाक्षींतांमहासुरः ॥ छादयामासचक्रैश्चमुंड
क्षिप्तैः सहस्रशः ॥१६॥ तानिचक्राण्यनेकानिविशमानानितन्मुखं
बभुर्यथार्कबिंबानिसुबहूनिघनोदरं ॥१७॥ ततोजहासातिरुषाभी
मभैरवनादिनी ॥ कालीकरालवदनादुर्दर्शदशनोज्ज्वला ॥१८॥

दु.८२

दु७०

उत्थाय च महासिंहं देवी चंडमधावत ॥ गृहीत्वा चास्य केशेषु शिरस्तेनासि
नाछिनत ॥१९॥ अथ मुंडोभ्यधावत्तां दृष्ट्वा चंडं निपातितं ॥ तमप्यपा
तयद्भूमौ सा खड्गाभिहतं रुषा ॥२०॥ हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपा
तितं ॥ मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं ॥२१॥ शिरश्चंडस्य काली
च गृहीत्वा मुंडमेव च ॥ प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकां ॥२२॥
मया तवात्रोपहृतौ चंडमुंडौ महापशू ॥ युद्धयज्ञे स्वयं शुंभं निशुंभं
च हनिष्यसि ॥२३॥ ऋषिरुवाच ॥ तावानीतौ ततो दृष्ट्वा चंडमुंडौ म
हासुरौ ॥ उवाच कालीं कल्याणी ललितं चंडिका वचः ॥२४॥ यस्माच्चंडं
च मुंडं च गृहीत्वा त्वमुपागता ॥ चामुंडेति ततो लोके ख्याता देवि भविष्यसि २५

इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेश्रीदेवीमाहात्म्येचंडमुंडवधो
नामसप्तमोध्याय॥७॥अथध्यानं॥ वीजसप्तभिरज्वलाकृतिरसौपाशसृ
ष्टिधृतिः॥ सप्तर्षिप्रणतांघ्रिपंकजयुगापाशत्रैलोक्यत्राणा॥ काश्मीरस्थवर
प्रसन्ननगरीमध्यस्नपीठस्थितादेवीसप्तकराप्रपूर्णाभगवतीश्रीशारि
कापातुमां॥१॥ इतिध्यानं॥ ऋषिरुवाच॥ चंडेचनिहतेदैत्येमुंडेच
विनिपातिते॥ बहुलेषुचसैन्येषुक्षयितेष्वसुरेश्वरः॥१॥ ततःकोपप
राधीनचेताःशुंभःप्रतापवान्॥ उद्योगंसर्वसैन्यानांदैत्यानामादि
देशह॥२॥ अद्यसर्वबलैर्दैत्याःषडशीतिरुदायुधाः॥ कंबूनांचतुर
शीतिर्निर्यांतुस्वबलैर्वृता॥३॥ कोटिवीर्याणिपंचाशदसुराणांकुला

दु॰
४३

निवैः॥ शतंकुलानिधौम्राणांनिर्गच्छंतुममाज्ञया॥ ४॥ कालिकादोर्हृदामौ
र्याःकालकेयास्तथासुराः॥ युद्धायसज्जानिर्यांतुआज्ञयात्वरितामम॥ ५
इत्याज्ञाप्यासुरपतिःशुंभोभैरवशासनः॥ निर्जगाममहासैन्यैःसहस्रै
र्बहुभिर्वृताः॥ ६॥ आयांतंचंडिकादृष्ट्वातत्सैन्यमतिभीषणं॥ ज्यास्व
नैःपूरयामासधरणीगगनांतरं॥ ७॥ ततःसिंहोमहानादमतीवकृत
वान्नृप॥ घंटास्वनेनतन्नादमंबिकाचोपबृंहयत्॥ ८॥ धनुर्ज्यासिंहघंटा
नांनादापूरितदिङ्मुखा॥ निनादैर्भीषणैःकालीजिग्येविस्तारितान
ना॥ ९॥ तन्निनादमुपश्रुत्यदैत्यसैन्यैश्चतुर्दिशं॥ देवीसिंहस्तथा
कालीसरोषैःपरिवारिताः॥ १०॥ एतस्मिन्नंतरेभूपविनाशायसुरद्वि

वै

४३

थां॥ भवायामरसिंहानामतिवीर्यबलान्विताः॥११॥ ब्रह्मेशगुहविष्णू
नां तथेन्द्रस्य च शक्तयः॥ शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चंडिकां ययौ॥१२
यस्य देवस्य यद्रूपं यथाभूषणवाहनं॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धु
माययौ॥१३॥ हंसयुक्तविमानाग्रे साक्षसूत्रकमंडलुः॥ आयाता ब्रह्म
णः शक्तिः ब्रह्माणीत्यभिधीयते॥१४॥ माहेश्वरी वृषारूढा त्रिशूलवर
धारिणी॥ महाहिवलया प्राप्ता चंद्ररेखाविभूषणा॥१५॥ कौमारी शक्तिह
स्ता च मयूरवरवाहना॥ योद्धुमभ्याययौ दैत्यानंबिका गुहरूपिणी॥१६
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता॥ शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्यु
पाययौ॥१७॥ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः॥ शक्तिः साप्याययौ तत्र

वाराहीविभ्रतीस्तनुं॥१८॥नारसिंहीनृसिंहस्यविभ्रतीसदृशंवपुः॥प्रा
प्तातत्रसटाक्षेपक्षिप्तनक्षत्रसंहतिः॥१९॥वज्रहस्तातथैवैन्द्रीगजरा
जोपरिस्थिता॥प्राप्तासहस्रनयनायथाशक्रस्तथैवसा॥२०॥ततःप
रिवृतस्ताभिरीशानोदेवशक्तिभिः॥हन्यंतामसुराःशीघ्रंममप्रीत्याहचं
डिकां॥२१॥ततोदेवीशरीरात्तुविनिष्क्रांतातिभीषणा॥चंडिकाश
क्तिरत्युग्राशिवाशतनिनादिनी॥२२॥साचाहधूम्रजटिलमीशानम
पराजिता॥दूतत्वंगच्छभगवान्पार्श्वंशुंभनिशुंभयोः॥२३॥ब्रूहि
शुंभंनिशुंभंचदानवावतिगर्वितौ॥येचान्येदानवास्तत्रयुद्धायस
मुपस्थिताः॥२४॥त्रैलोक्यमिंद्रोलभतांदेवाःसंतुहविर्भुजः॥यूयं

प्रयातपात्ता लं यदि जीवितुमिच्छत ॥ २५ ॥ वलावले पादद्वया इवंतो पु वे

द्वकं ह्रिया ॥ न दमा कर्तुमपेतुमच्छिवा विधिनैनवा: ॥ २६ ॥ यत्ता निगु

णो दैत्य नत्त यादेमा शिव: स्वयं ॥ शिव दूती त्रिलोके स्मिन्स्तत: सा ख्याति

मागता ॥ २७ ॥ ते पि श्रुत्वा वचो देव्या: शर्वाख्यातं महासुरा ॥ अमर्षापू

रितागन्तुर्यत्र कात्यायनी स्थिता ॥ २८ ॥ ततः प्रथम मेवाग्र शरशक्त्यृष्टि

वृष्टिभि: ॥ ववर्ष रुद्धतामर्षास्तां देवीममरारय: ॥ २९ ॥ साच तान्प्रहि

तान्वाणा न्वूलशक्ति परश्वधान ॥ चिच्छेद लीलया ध्मातधनुर्मुक्तै र्म

हेषुभि: ॥ ३० ॥ तस्याग्रतस्तथा काली शूलपातविदारितान् ॥ खट्वांग

पोथितांश्चारीन्कुर्वती व्यचरत्तदा ॥ ३१ ॥ कमंडलुजलाक्षेपहतवीर्यान्ह

दुः
६५

तौजसः ॥ ब्रह्माणी चाकरोछत्रुन्येन येन स्म धावति ॥ ३२ ॥ माहेश्वरी
त्रिशूलेन तथा चक्रेण वैष्णवी ॥ दैत्यांजघान कौमारी तथा शक्त्याति
कोपिना ॥ ३३ ॥ ऐंद्री कुलिशपातेन शतशो दैत्यदानवाः ॥ पेतुर्विदारि
ताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥ ३४ ॥ तुंडप्रहारविध्वंस्ता दंष्ट्राग्रक्षत
वक्षसाः ॥ वाराहमूर्त्यान्यपतंश्चक्रेण च विदारिताः ॥ ३५ ॥ नखैर्विदा
रितांश्चान्यां भक्षयंती महासुरान् ॥ नारसिंही चचाराजौ नादापूर्णदि
गंतराः ॥ ३६ ॥ चंडाट्टहासैरसुराः शिवदूत्यभिदूषिताः ॥ पेतुः पृथिव्यां प
तितांस्तांश्चखादाथ सा तदा ॥ ३७ ॥ इति मातृगणं क्रुद्धं मर्दयंतं महा
सुरान् ॥ दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकान् ॥ ३८ ॥ पलायन

६५